दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-130 | 1 | मार्च 02, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**


अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणचतुर्दशी
फाल्गुण 18 प्रविष्टांशः मङ्गलमयः भवेत्

2 भारतेन वेस्ट इंडीज दलं पञ्चस्तोभैः (5 wickets) पराजितम्। अनेन विजयेन सह भारतीयदलं स्पर्धायाः 'सेमीफाइनल' (Semi-final) चक्रे प्रविष्टः

3 मार्चमासस्य ७-८ दिनाङ्कयोः दिल्लीनगरे भविष्यति ऐतिहासिकं 'भारती- नारीतः नारायणी' राष्ट्रियसम्मेलनम्

5 पाकिस्तान-अफगानिस्तान सीमा-सङ्घर्षः- 'मुक्त-युद्धस्य' उद्घोषणा

## वरिष्ठः धर्मगुरुः अयातुल्ला अलीरेज़ा अराफी इत्येषः अली खामेनेई इत्यस्य हत्यायाः अनन्तरं ईरान-देशस्य अन्तरीम-सर्वोच्चनेतृत्वेन कार्यं करिष्यति



**हिमसंस्कृतवार्ता।** वरिष्ठः धर्मगुरुः अयातुल्ला अलीरेज़ा अराफी इत्येषः अली खामेनेई इत्यस्य हत्यायाः अनन्तरं इरान-देशस्य अन्तरीम-सर्वोच्च नेतृत्वेन कार्यं करिष्यति। इस्ना वार्ता-वाहिन्यानुसारं, अयातुल्ला अलीरेज़ा अराफी इत्येनं सर्वोच्चनेतृत्वस्य कर्तव्यानि निर्वोढुम् अस्थायीनेतृत्वपरिषदः सदस्यत्वेन नियुक्तः। यावत् ईरान्-देशस्य संवैधानिकप्रक्रियायाः अन्तर्गतं उत्तराधिकारी न चितः भविष्यति।

### ईरानदेशस्य सर्वोच्च नेता

#### अयातुल्ला अली खामेनेई दिवंगतः

ईरानी-प्रशासनेन मीडिया माध्यमेन पुष्टि-कृतम् यत् अमेरिकी-इजराइली-वैमानिक-आक्रमणेषु ईरानदेशस्य सर्वोच्च नेता अयातुल्ला अली खामेनेई दिवंगतः। तस्य मृत्युः अमेरिका-इस्राइल-संयुक्त प्रक्षेपास्त्र-आक्रमणानन्तरं अभवत्, येषु ईरानस्य-सैन्य-स्थलानि लक्ष्यीकृतानि आसन्। ईराने चत्वारिंशत्-दिवसानां राजकीय-शोकः घोषितः। ईरानस्य प्रशासनिक वार्तावाहिन्यानुसारं देशस्य रक्षा-परिषदः सभां लक्ष्यीकृत्य कृतस्य आक्रमणस्य परिणामस्वरूपम् ईरानस्य सेनाप्रमुखः रक्षा मन्त्री चोभौ मृत्युमुपगतौ । जनरल अब्दुल रहीम मूसावी तथा रक्षा-मन्त्री जनरल अजीज नासिरजादेह, तथा च ईरानस्य अर्धसैनिक क्रान्तिकारिणां प्रमुखः एवं सुरक्षा-परामर्शदाता अली शमखानी अपि तस्मिन् आक्रमणे हताः। ईरानस्य प्रशासनिक वार्तावाहिन्या अद्य सैन्य-नेतृणां निधनस्य घोषणा कृता। तेन उक्तं यत् न्यूनातिन्यूनं द्विशताधिकाः जनाः मृताः तथा सप्तशताधिकाः जनाः व्रणिताः सन्ति। प्रतिवेदनानुसारं आक्रमणेषु प्रायः ईरानस्य चत्वारिंशत् अधिकारिणः अपि हताः। प्रत्युत्तरे ईरानदेशेन पश्चिम एशियाक्षेत्रे आक्रमणानि आरब्धानि । दुबई, दोहा, बहरीन तथा कुवैत इत्येतेषु स्थानेषु ईरानेन आक्रमणानां वार्ताः प्राप्ताः। एतानि तानि स्थानानि सन्ति यत्र अमेरिकी सैन्य आधाराः सन्ति वा ये देशाः अमेरिकादेशस्य सहयोगिनः सन्ति । अमेरिकादेशस्य राष्ट्रपति डोनाल्ड ट्रम्पः सामाजिक माध्यमे लिखितवान् यत् खामेनेई इत्यस्य निधनानंतरम् ईरानी-जनानां कृते स्वदेशं पुनः प्राप्तुं महान् अवसरः अस्ति। सः अवदत् यत् आसप्ताहं अथवा दीर्घकालपर्यन्तं तीव्र तथा सूक्ष्मं गोलिकावर्षणं प्रवर्तिष्यते ।

### सर्वोच्च-नेतुः अयातुल्ला अली खामेनेई इत्यस्य निधने शोकं प्रकटयितुं समागताः सहस्रशः जनाः



तेहरान्, इस्फ़हान तथा मशहद् चेत्यादिषु नगरेषु सहस्रशः जनाः स्वस्य सर्वोच्च-नेतुः अयातुल्ला अली खामेनेई इत्यस्य निधने शोकं प्रकटयितुं समागताः । राज्य वार्तावाहिन्या तस्य निधनं "रक्षक की शहादत" इति रूपेण निरूपितम्, यत्र तस्य अन्तः पराजयः न, अपितु राष्ट्रस्य सार्वभौमत्वाय अन्तिम-बलिदानरूपेण प्रदर्शितम्। नागरिकाः पवित्रस्थानेषु श्रद्धाञ्जलिं अर्पयन्ति तथा आक्रमणानां विरोधं कुर्वन्ति, यतः ईरान् देशः नेतृत्व-परिवर्तनाय वर्धित राष्ट्रीय सुरक्षायै च सज्जः अस्ति। मध्य-ईरानस्य इस्फ़हान् नगरस्य निवासिनः इमाम-चौक् इत्यत्र समागत्य आक्रमणानां विरोधं कृतवन्तः तथा अयातुल्ला खामेनेई इत्यस्य निधने शोकं प्रकटितवन्तः। पूर्वोत्तर दिशि स्थिते मशहद् नगरे शोकाकुलाः जनाः स्वस्य दिवंगत नेतारं श्रद्धांजलिं प्रदातुं इमाम-रज़ा पवित्र-तीर्थस्थले समागताः।

### अमेरिकादेशः तस्य उपरि सुदृढं प्रहारं करिष्यति इति

अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड ट्रम्पेन तेहरानं सावधानं कृतं यत् अमेरिकादेशः तस्य उपरि सुदृढ प्रहारं करिष्यति इति। सः ट्रूथ् सामाजिकान्तर्जालीये पटले लिखिते लेखे उक्तवान् यत् इरान देशेन अयैव उक्तं यत् अतीव सुदृढप्रहारं करिष्यन्ति इति, यावत् पूर्वं कदापि न कृतम्। सः अवदत् यत् ते एतत् न करिष्यन्ति, तथापि यदि ते करिष्यन्ति तर्हि अमेरिका-देशः तेषाम् उपरि पूर्वं न दृष्टं तावत् शक्त्या प्रहारं करिष्यति । इरान्-देशः स्वस्य सर्वोच्चनेतुः अयातुल्ला खामेनेई इत्यस्य हत्यायाः प्रतिकारस्य प्रतिज्ञां कृत्वा, अमेरिका-इसेल-देशयोः आधार-स्थलेषु नूतनानि आक्रमणानि प्रारब्धानि ।

**सुभाषितम्**

एक एव सुहृद्धर्मो,
निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं,
सर्वमन्यद् हि गच्छति।।
-महासुभाषितसंग्रहः

भावार्थः:- मनुष्य की मृत्यु होने पर जैसे उसका शरीर नष्ट हो जाता है वैसे ही अन्य सभी वस्तुएं उसका साथ छोड देती हैं। परन्तु अपने जीवनकाल में किया हुआ धार्मिक आचरण ही मित्र के समान उसके मरणोपरान्त परलोक में साथ देता है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

### कनाडा-प्रधानमन्त्रिणः मार्क-कार्नी-महोदयस्य नवदेहली-आगमनम्

कनाडा-देशस्य प्रधानमन्त्री मार्क कार्नी मुम्बई-नगरस्य सफलां यात्रां निर्वर्त्य गत सायङ्काले देहलीं प्राप्तवान्। सः भारतस्य चतुर्दिनात्मक-भ्रमणे अस्ति।

## मदुरै नगरे प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रायः सार्ध चतुः सहस्र-कोटिरूप्यकाणां आधारभूत संरचना-प्रकल्पानाम् उद्घाटनं कृतम्



तमिलनाडुराज्यस्य मदुरै नगरे अपराह्ने प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रायः सार्ध चतुः सहस्र-कोटिरूप्यकाणां आधारभूत संरचना-प्रकल्पानाम् उद्घाटनम्, राष्ट्राय समर्पणं, शिलान्यासः च कृतः। एतासु परियोजनासु कुम्भकोणम्, येरकाड, वेल्लोर इत्येतेषु स्थानेषु त्रीणि नूतनानि आकाशवाणी एफ्. एम्. प्रेषित्र-यन्त्राणि सन्ति। एतानि प्रेषित्र-यन्त्राणि क्षेत्रीय-प्रसारस्य विस्तारं करिष्यन्ति, अविरामं एफ़. एम्.-प्रसारणं सुनिश्चितं करिष्यन्ति, राज्यस्य बहुविध मण्डलेषु सार्वजनिक-प्रसारण-सेवां प्रसारणम् अपि वर्धिष्यन्ति। एन. डी. ए-दलस्य जनसभां सम्बोधयन् प्रधानमन्त्री अवदत् यत्, अद्यतनः कार्यक्रमः तमिळ्नाडुराज्यस्य विकासयात्रायाः गौरवपूर्णाध्यायःअस्ति।श्रीमोदिना उक्तं यत् एताभिः परियोजनाभिः सम्पर्क वर्धिष्यति, अर्थव्यवस्थायाः वृद्धिः भविष्यति, वृत्यावसरस्य सृजनं भविष्यति, लक्षशः जनानां जीवनं परिवर्तयिष्यते च । प्रधानमन्त्री तिरुप्पारन् कुन्द्रम्-नगरस्य अरुल्मिगु सुब्रमण्य-स्वामी मन्दिरे अपि दर्शनं पूजां च विधाष्यति।

**प्रधानमन्त्री नरेंद्रमोदी पुदुचेरी नगरे**

प्रधानमन्त्री नरेंद्रमोदी पुदुचेरी नगरे सप्तविंशत्यधिकशतकोटिरूप्यकाधिकमूल्यानां विकासपरियोजनानां शिलान्यासः राष्ट्रार्पणं च अकरोत्। प्रति व्यक्ति-आयस्य वृद्धि देशे च सर्वोच्च सामाजिक-सूचकाङ्क प्राप्तिं दृष्ट्वा प्रधानमन्त्रिणा पुडुचेरी-प्रदेशस्य प्रशंसा कृता। सः अवदत् यत् प्रशासनं अस्य केन्द्रशासितप्रदेशस्य विकास अधिकं वेगेन अग्रे नेष्यति ।तेन विश्वासः प्रकटितः यत् पुडुचेरी भविष्ये चिकित्सापर्यटनस्य प्रमुखकेन्द्ररूपेण उदयमानं भवितुं शक्नोति । अस्मिन् कार्यक्रमे प्रधानमन्त्रिणा उन्नविंशतिः विकास परियोजनानां उद्घाटनम् अपि कृतम्। तासु परियोजनासु प्रधानमन्त्री ई बसयान सेवा, ई-बसयानानां प्रारम्भः, नगरे नवाचारम्, एकीकरणम् तथा स्थिरतां प्रोत्साहयितुं आर्थिकदृष्ट्या दुर्बलवर्गाणां कृते आवास-परियोजनाः, तथा च पुडुचेरी प्रशासनस्य प्रमुखाः जलापूर्ति-परियोजनाः समाविष्टाः सन्ति ।

# साहसिकपर्यटनस्य प्रवर्धनं भविष्यति; अनुमतिपत्राणि अन्तर्जालमाध्यमेन दास्यन्ते, वृत्त्यावसराः अपि लप्स्यन्ते



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशः सर्वकारेण रोड- एक्स्पिडिशन- पर्यटननीतेः निर्माणप्रक्रिया आरब्धा अस्ति। अस्याः नीत्याः प्रवर्तनात् सर्वकाराय आयस्य नूतनः स्रोतः भविष्यति, देशविदेशेभ्यः आगच्छद्भ्यः पर्यटकेभ्यः च नवीनाः सुविधाः उपलब्धाः भविष्यन्ति। साहसिक- वाहन-चालनक्रियाः नियमसम्मतरीत्या सुरक्षित-प्रकारेण च संचाल्यन्ते। नवनीत्याः अन्तर्गतं 4×4 ड्राइव, मोटरसायकिल- एक्स्पिडिशन, उच्च- ऊर्ध्वतामार्गाः (हाई- एल्टीट्यूड- रूट्स) शकटसमूहपर्यटनं प्रोत्साह्यते।

जालमाध्यमेन अनुमतिपत्र-प्रणाली प्रवर्तिष्यते, येन पारदर्शिता वर्धिष्यते, पर्यटकाः पूर्वमेव अनुमतिं प्राप्तुं शक्नुवन्ति। सहैव वाहन- योग्यता- परीक्षणम्, अनिवार्य-बीमायोजनम्, सुरक्षामानकाः, आपत्कालीनसहायतातन्त्रं च प्रवर्तिष्यन्ते। अस्याः नीत्याः माध्यमेन अनुमतिपत्रशुल्कात्, पञ्जीकरणात्, आयोजनशुल्कात्, पर्यटन- क्रियासम्बद्ध- कराभ्यः च सर्वकाराय प्रत्यक्ष-आयः भविष्यति।

अतिरिक्ततया अतिथिगृहम्, होम-स्टे, भोजनालय, ईंधनकेन्द्र, स्थानीयपरिवहनसेवा, मार्गदर्शकसेवा इत्यादीनां याचना वर्धिष्यते; येन प्रदेशस्य पर्यटन-व्यवसायिनः लाभं प्राप्स्यन्ति। अपि ऋतु-कालेषु साहसिकवाहन-चालनप्रेमिणां आगमनेन वर्षपर्यन्तं पर्यटनक्रियाः प्रवर्तिष्यन्ते। अन्यराज्येभ्यः आगच्छद्भ्यः साहसिकयात्रिकेभ्यः सुरक्षिताः निर्दिष्टमार्गाः, आभासीय-अनुमतिपत्राणि, स्पष्टनिर्देशाः, आपत्कालीन-सहायता च प्रदास्यते; येन तेषां यात्रानुभवः अधिकः सुव्यवस्थितः विश्वसनीयः च भविष्यति।

प्रदेशस्य पर्यटनव्यवसायिनः, विशेषतः होम-स्टे-सञ्चालकाः, स्थानीययुवानः, भाडे वाहनप्रदातारः, यान्त्रिकशिल्पिनः च नूतनान् रोजगार-अवसरान् आय-स्रोतांश्च प्राप्स्यन्ति। एषा नीति हिमाचलप्रदेशं राष्ट्रीयस्तरे साहसिक-पर्यटनकेंद्ररूपेण प्रतिष्ठापयिष्यति।

**पर्यटन-विभागेन परामर्शः आमन्त्रिताः**

पर्यटनविभागस्य निदेशकः विवेक भाटिया इति उक्तवान् यत् हिमाचलप्रदेशस्य रोड- एक्स्पिडिशन- पर्यटननीतेः निर्माणप्रक्रिया आरब्धा अस्ति, सम्बन्धिभ्यः हितधारकेभ्यः परामर्शः अपि याचिताः सन्ति। प्रदेशम् आगच्छद्भ्यः रोड- एक्स्पिडिशन- प्रेमिभ्यः जालमाध्यमेन अनुमतिपत्राणि प्रदास्यन्ते। सुरक्षामानकानां प्रवर्तनात् पारदर्शिता वर्धिष्यते, पर्यटकानां विश्वासः दृढीभविष्यति। अनेन उपक्रमेण प्रदेशस्य आयः वर्धिष्यते, स्थानीययुवानां कृते नूतन- रोजगार- अवसराः सृज्यन्ते।

## केन्द्रीय-पर्यटनमन्त्रालयेन अपि सुरक्षानियमाः निर्गताः

मंत्रालय ऑफ़ टूरिज़्म -इत्यनेन अपि साहसिक-पर्यटनस्य कृते आदर्श-सुरक्षा-निर्देशिकाः निर्गताः सन्ति, यासु स्थलाधारित-साहसिक-क्रियाः यथा 4x4 जीप- सफारी, उच्च- ऊर्ध्वता- स्वचालितयात्राः अन्तर्भवन्ति। तत्र सुरक्षा, अनुज्ञापत्रप्रणाली, मानकसंचालनप्रक्रिया इत्यादयः निर्दिष्टाः सन्ति। राज्यपर्यटनविभागान् ताः अंगीकारयितुं सूचितम् अस्ति।

# राजकीय- प्राथमिक- शिक्षकसङ्घस्य सुक्खुसर्वकारं प्रति 'हल्ला बोल' (उद्घोषः), प्रतिमण्डलं विरोधप्रदर्शनम्



**हिमसंस्कृतवार्ताः- शिमला।**

राजकीय- प्राथमिक- शिक्षकसङ्घेन प्रदेशसर्वकारस्य विरुद्धं रणभेरी वादिता। सङ्घेन रविवासरे शिमलानगरस्य 'चौड़ा मैदान' इत्यत्र स्वकीयानां याचनानां निमित्तम् अनुरोधयात्रा ('आग्रहरैली') आयोजिता। अस्यां यात्रायां शिमलामण्डलस्य सर्वेषां २१ शिक्षाखिण्डानां शिक्षकाः सम्मिलिताः अभवन्। शिक्षकाः प्रदर्शनमाध्यमेन गतवर्षे शिक्षाविभागेन प्रसारितां नूतन-परिसर-प्रणालीं (क्लस्टर-सिस्टम) सम्बद्धां अधिसूचनां प्रतिग्रहीतुं (निरस्तीकरणाय) याचनां कृतवन्तः। सङ्घस्य अधिकारिणः आरोपं कुर्वन्तः अकथयन् यत् २३ सितम्बर २०२५ दिनाङ्कस्य अधिसूचनायां प्राथमिकशिक्षायाः पूर्णं प्रशासकीय- नियन्त्रणं सञ्चालनं च प्रधानाचार्यमहोदयाय दत्तम् अस्ति, यत् प्राथमिकशिक्षकाणां हितानां प्रतिकूलं वर्तते। अधिकारिभिः उक्तं यत् १९८४ तमात् वर्षात् प्राथमिकशिक्षायाः पृथक् संरचना कार्यं करोति, पृथक् 'संकुल-प्रणाल्या' (Cluster System) एव प्रशासकीयव्यवस्था सञ्चालिता आसीत्। नूतनव्यवस्थायाः प्रवर्तनेन कार्यं केन्द्रीकृतं भविष्यति, येन शिक्षायाः गुणवत्तायां प्रतिकूलः प्रभावः भवितुं शक्नोति। ते अवदन् यत् एषः निर्णयः प्राथमिकशिक्षकान् द्विस्तरीय-प्रशासकीय- एककानाम् अधीनं करणम् इव अस्ति, येन भविष्ये प्राथमिकशिक्षायाः संरचना दुर्बला भवितुं शक्नोति। सङ्घेन प्रतिपादितं यत् जे. बी. टी. (JBT) शिक्षकाः एतान् विषयान् स्वीकृत्य बहुवारं शिक्षामन्त्रिणा सह मिलितवन्तः। मन्त्रिणा जे.बी.टी. शिक्षकाणां हितानां संरक्षणाय आश्वासनानि दत्तानि। किन्तु मन्त्रिणः आश्वासनान्तरमपि विभागेन तस्य आश्वासनस्य विपरीतम् इयम् अधिसूचना निर्गता। शिक्षकाः अवदन् यत् अस्याः यात्रायाः अनन्तरं शिक्षकाः मण्डल-प्रशासनस्य (District Administration) माध्यमेन मुख्यमन्त्रिणे शिक्षामन्त्रिणे च ज्ञापनं प्रेषयित्वा अधिसूचनायाः सद्यः निरस्तीकरणस्य अभ्यर्थनां करिष्यन्ति।

शिक्षकाः सूचितवन्तः यत् अद्य प्रदेशे सर्वत्र मण्डलस्तरे 'आग्रहयात्रा' आयोज्यते। सङ्घेन सचेतना दत्ता यत् यदि निर्णयः शीघ्रं न प्रत्याहृतः, तर्हि हिमाचलप्रदेशस्तरे उग्रान्दोलनं प्रारप्स्यते। अस्मिन् प्रदर्शने मण्डलाध्यक्षः मनोजकुमारः, महासचिवः हेमप्रकाशवर्मा, कोषाध्यक्षः विजय भीमटा इत्येतेषां सह शतशः शिक्षकाः उपस्थिताः आसन्।

## भारत-वेस्ट इंडीज क्रिकेट-स्पर्धा

# भारतस्य विजयः



कोलकाता, भारतम् — रविवासरे (१ मार्च २०२६) कोलकाता-नगरस्य ईडन गार्डन्स क्रीडाङ्गणे प्रवृत्तायां 'टी-२०' विश्वकप-स्पर्धायाः (Super 8) मुख्ये द्वन्द्वे भारतेन वेस्ट इंडीज दलं पञ्चस्तोभैः (5 wickets) मितैः ताडनैः पराजितम्। अनेन विजयेन सह भारतीयदलं स्पर्धायाः 'सेमीफाइनल' (Semi-final) चक्रे स्वस्थानं सुरक्षितं कृतवत्।

### क्रीडायाः मुख्यबिन्दवः (Highlights):

**लक्ष्यम्-** वेस्ट इंडीज दलं २० चक्रेषु १९५ धावनाङ्कान् (195/4) अकरोत्।

**भारतस्य विजयः-** भारतं १९.२ चक्रेषु १९९ धावनाङ्कान् (199/5) सम्पाद्य विजयं प्राप्तवत्।

**प्रमुखक्रीडकः-** भारतस्य शीर्षफलकक्रीडकः सञ्जु सैमसनः ९७* धावनाङ्कान् (५० कन्दुकेषु) निर्माय 'प्लेयर ऑफ द मैच' इति उपाधिना भूषितः।

**स्पर्धा विवरणम्**

**धावनाङ्काः** १९५/४ (२० चक्राणि) १९९/५ भारतम् (१९.२ चक्राणि)

**मुख्य-फलक्रीडकः**

**बेस्टइण्डीज-** रोस्टन चेज (४०), जेसन होल्डर (३७*) **भारतम्-** सञ्जु सैमसन (९७*), तिलक वर्मा (२७)

**मुख्यकन्दुकक्षेपकः-**

**बेस्टइण्डीज-** जेसन होल्डर (२/३८) **भारतम्-** जसप्रीत बुमराह (२/३६)

**विशेषम्-** सञ्जु सैमसनस्य इयम् आहुतिः 'टी-२०' विश्वकप-इतिहासे कस्यचित् अपि भारतीयक्रीडकस्य लक्ष्यप्राप्तौ (Run Chase) सर्वश्रेष्ठं प्रदर्शनम् अस्ति। भारतीयदलस्य आगामी 'सेमीफाइनल' स्पर्धा गुरुवासरे मुम्बई-नगरे इङ्ग्लैण्ड (England) दलेन सह भविष्यति।

# नागपुरस्य राउलगावइत्यत्र विस्फोटे सप्तदश जनाः मृताः



नागपुरस्य राउलगाव-इत्यत्र एस. बी. एल. एनर्जी लिमिटेड् इत्यत्र जाते विस्फोटे सप्तदश जनाः मृताः। महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र फड्नविसेन सामाजिक-पटले सूचनैषा प्रदत्ता। विस्फोटनानन्तरं महती अग्निप्रकोपः अभवत् । अस्यां घटनायां अष्टादश कर्मचारिणः व्रणिताः। राष्ट्रिय आपत् प्रतिक्रिया-बलस्य, राज्य-आपत्-प्रतिक्रिया-बलस्य च दलानि तत्र आगतानि सन्ति, उद्धारकार्याणि च तीव्रवेगेन प्रचलन्ति।

# मार्चमासस्य ७-८ दिनाङ्कयोः दिल्लीनगरे भविष्यति ऐतिहासिकं 'भारती- नारीतः नारायणी' राष्ट्रियसम्मेलनम्



**हिमसंस्कृतवार्ताः- नवदेहली।**
राजधानी-देहलीमध्ये आगामिनि मार्चमासस्य ७-८ दिनाङ्कयोः भारतस्य महिलाविचारकाणां ऐतिहासिकं राष्ट्रियसम्मेलनम् आयोजितं भविष्यति। राष्ट्रसेविकासमितिः, 'शरण्या' तथा 'भारतीयविद्वत्परिषद्' इत्येतासां संस्थानां पदाधिकारीभिः शनिवासरे पत्रकारगोष्ठ्यां इयं सूचना प्रदत्ता। विज्ञानभवने 'भारती नारीतः नारायणी' इति नाम्ना आयोज्यमानस्य अस्य द्विदवसीय- राष्ट्रियसम्मेलनस्य उद्घाटनं देहल्याः मुख्यमन्त्रिणी रेखागुप्ता करिष्यति, समापनं च राष्ट्रपतेः द्रौपदीमुर्मु महोदयायाः गरिमामय-उपस्थितौ भविष्यति।

## भारतीयनार्याः सकारात्मकशक्तेः

### एकत्रीकरणस्य सङ्कल्पः- अन्नदनम् सीता गायत्री

समित्याः प्रमुखकार्यवाहिका माननीया अन्नदनम सीता गायत्री महोदया अवदत् यत् 'भारती- नारीतः नारायणी' सम्मेलनं केवलं कश्चन उद्घोषः एव नास्ति, अपि तु भारतीयनार्याः सकारात्मकशक्तेः एकत्रीकरणस्य सङ्कल्पः अस्ति। तया प्रतिपादितं यत् देशे महिलानाम् अधिकाराय अनेकाः संस्थाः कार्यं कुर्वन्ति, किन्तु समितिः समग्रसमाजस्य सर्वाङ्गीणविकासाय कार्यं करोति। सा स्पष्टीकृतवती यत् समितिः पाश्चात्य 'फेमिनिज्म' (नारीवाद) इति अवधारणया सह संमता नास्ति, यतः तस्यां पुरुषैः सह संघर्षस्य भावः निहितः भवति। गायत्री महोदयानुसारं भारतीयदृष्ट्या स्त्रीपुरुषौ समानौ स्तः। तौ एकस्यैव प्रकाशपुञ्जस्य द्वे ज्योती इव स्तः। समित्याः स्वयंसेविकाः केवलं महिलानाम् उत्थानपर्यन्तं सीमिताः न सन्ति, अपि तु सांस्कृतिक- नैतिक- आध्यात्मिक- आर्थिकदृष्ट्या सम्पूर्णसमाजस्य उत्थानाय कार्यं कुर्वन्ति। तया सूचितं यत् समित्याः स्थापना १९३६ तमे वर्षे अभवत्, अधुना अस्याः ९० वर्षाणि पूर्णानि जातानि। वर्तमाने देशे ४५०० शाखाः संचालिताः सन्ति। स्वयंसेविकाभिः संचालिताः ६५ अशासकीयसंस्थाः (NGOs) प्रायः २००० सेवाप्रकल्पान् चालयन्ति, ये शिक्षा- स्वास्थ्य- स्वावलम्बनक्षेत्रेषु सक्रियाः सन्ति। महानगरेभ्यः आरभ्य ग्रामीणदुर्गमक्षेत्रान् यावत् समित्याः कार्यविस्तारः जातः।
भारतीयविद्वत्परिषदः सचिवा डॉ. वी. शिवानी अवदत् यत् 'भारती– नारीतः नारायणी' एका महत्त्वाकांक्षिणी परियोजना अस्ति, यस्याः उद्देश्यं महिलाः 'मौनशक्तितः अग्रे नीत्वा 'प्रभावी नेतृत्वकर्त्रीरूपेण निर्माणं वर्तते।

## अष्ट-प्रमुखविषयेषु भविष्यति चर्चा

सम्मेलने अष्ट-प्रमुखविषयेषु विद्या, शक्तिः, मुक्तिः, चेतना, प्रकृतिः, संस्कृतिः, सिद्धिः, कृतिः च चर्चा भविष्यति।
चतुर्भिः विशेषज्ञसमूहमाध्यमैः बहु-आयामी विचारमन्थनं भविष्यति। महिलासांसदां राष्ट्रियः वर्गः 'पञ्चपरिवर्तनम्' इति विषये चर्चां करिष्यति। महिलाकुलपतीनां भिन्नः वर्गः आयोजितः भविष्यति। 'साध्वीसङ्गम' वर्गे योग- धर्म- अध्यात्मविषयेषु चिन्तनं भविष्यति।
मुख्यात् सम्मेलनात् पूर्वं देशे सर्वत्र अस्मिन् विषये अनेके कार्यक्रमाः आयोजिताः, येभ्यः प्राप्ताः परामर्शाः, सम्मेलने प्रस्तुताः संस्तुतयः च भारतसर्वकारस्य सम्बद्धविभागेभ्यः विचारार्थं क्रियान्वयनार्थं च प्रेषयिष्यन्ते।
'शरण्या' संस्थायाः अध्यक्षा अञ्जु आहूजा अवदत् यत् एतत् सम्मेलनं देशस्य प्रत्येकवर्गस्य महिलानां आत्मनिर्भरतायै एका प्रमुखा आशा अस्ति। नारीं 'नारायणी' पदे प्रतिष्ठापयितुं स्वा संस्थायाः लक्ष्यमस्ति इति तया प्रतिपादितम्।
अस्मिन् अवसरे सूचितं यत् सम्मेलने प्रमुखसञ्चालिका शान्ता अनायदानम, साध्वी ऋतम्भरा, केन्द्रीयमन्त्री जितेन्द्र सिंहः, धर्मेन्द्र प्रधानः, अन्नपूर्णा देवी इत्यादयः अनेके गणमान्याः अतिथयः उपस्थिताः भविष्यन्ति।

# हिमाचलप्रदेशस्य काङ्गडाविमानतले विदेशीयाः पर्यटकाः अवरुद्धाः, देहलीतः विमानयात्रा निरस्ता, अधुना अत्रैव प्रतीक्षां कुर्वन्ति



**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमचलप्रदेशस्य काङ्गडाविमानतले विदेशीयाः पर्यटकाः विमानयात्रायाः प्रतीक्षां कुर्वन्ति। इजराइल ईरानयोः विवादस्य, खाडीदेशेषु आक्रमणानां कारणेन विमानसेवाः बाधिताः सन्ति। देहलीनगरात् आगन्तुं नियोजिता विमानयात्रा निरस्ता अभवत्। अतः पर्यटकाः अद्य काङ्गडायामेव स्थित्वा प्रतीक्षां कुर्वन्ति- कदा विमानसेवाः पुनः प्रारभ्यन्ते, कदा च ते स्वदेशं प्रति गन्तुं शक्नुवन्ति इति।
इजरायली-पर्यटका जेला नाम्नी अवदत्- "मम अद्य प्रातःकाले इजराइलदेशं प्रति गन्तुं योजना आसीत्, किन्तु मम विमानयात्रा निरस्ता अभवत्। अतः यावत् गृहं प्रति प्रतिनिवर्तनस्य कश्चित् उपायः न लभ्यते, तावत् अहं अत्रैव स्थास्यामि। मम केवलः एषः सन्देशः- समस्तमानवता एका एव अस्ति। मम अत्यन्त-गम्भीरा प्रार्थना शान्तये अस्ति।"

# 'एंटी-चिट्टा' इति अभियानस्य अन्तर्गतं १४५ स्थानेषु कार्यविधिः, विपुलमात्रायां मादकद्रव्याणां अवैधमद्यस्य च अवाप्तिः

**हिमसंस्कृतवार्ताः- शिमला,**
हिमाचलप्रदेशस्य पुलिसप्रवक्ता अवदत् यत् मुख्यमन्त्रिणा सुखविंदरसिंह सुक्खु महोदयेन प्रवर्तितस्य प्रदेशव्यापिनः 'चिट्टा- निरोधी- जनान्दोलनस्य' अन्तर्गतं, 'चिट्टामुक्त- हिमाचलस्य' सङ्कल्पं, सशक्तनेतृत्वं, चिट्टा- तस्कर- समूहस्य च समूलनाशस्य प्रतिबद्धतां च आधृत्य हिमाचलप्रदेश- आरक्षकदलेन निरन्तरं, प्रभावकारिणी, कठोरा च कार्यविधिः क्रियमाणा अस्ति। तेन उक्तं यत् अस्यैव अभियानस्य द्वितीयचरणस्य अन्तर्गतं १ मार्च २०२६ दिनाङ्के प्रदेशस्य सर्वेषु मण्डलेषु मादकद्रव्य- तस्करीविरुद्धं समकालिकं/ समानान्तरं च अन्वेषण- सहसानिरीक्षण- अभियानं सञ्चालितम्। एतत् विशेषमभियानं राज्यगुप्तचरविभागेन सशस्त्रबलैः, मण्डल- आरक्षकदलेन च संयुक्ततया गुप्तचर- सूचनायाः आधारेण सफलतापूर्वकं सम्पन्नम्। प्रवक्ता अवदत् यत् अभियानकाले मादकद्रव्य- अन्वेषणयन्त्रस्य ('ड्रग डिटेक्शन किट') प्रभावकारी उपयोगः कृतः। अन्वेषण- अवाप्ति- बन्दीकरणस्य समस्तप्रक्रियायाः विधिवत् चलच्चित्राङ्कनं ('वीडियोग्राफी') सुनिश्चितं कृतम्। सर्वाः कार्यविधयः एन. डी. पी. एस. अधिनियमस्य, बी. एन. एस. एस. आयुध- अधिनियमस्य, अन्येषां प्रयुक्त- विधिक- प्रावधानानां च पूर्णानुपालनेन कृताः।




अभियानकाले आहत्य १४५ स्थानेषु अन्वेषणं विहितम्। अस्मिन् काले ४०६ ग्राम-परिमितं चरस, १९.२३६ ग्रामपरिमितं चिट्टा (Synthetic Drug), १२४ ग्राम-परिमितं चूरा-पोस्तं तथा च ४,६५,१०० मिलीलीटर-परिमितम् अवैधमद्यं प्राप्तम्। अस्याः कार्यविधेः अन्वेषणे एन.डी.पी.एस. अधिनियमस्य अन्तर्गतं ०६, आबकारी-अधिनियमस्य अन्तर्गतं ०४ अभियोगाः पञ्जीकृताः। राज्यसर्वकारः हिमाचलप्रदेश- आरक्षकदलञ्च 'नशामुक्त- समाजस्य' लक्ष्यं प्रति एतद् अभियानं अधिकं व्यापकं, वैज्ञानिकं, आक्रामकं तथा च 'शून्य- सहिष्णुता' (Zero Tolerance) इति दृष्टिकोणेन अग्रे नेतुं पूर्णतः प्रतिबद्धं वर्तते। आरक्षकविभागेन नागरिकेभ्यः, विशेषतः युवकेभ्यः प्रार्थना कृता यत् मादकद्रव्य- सम्बद्धायाः कस्यापि गतिविधि-सूचना सद्यः ११२ इति सङ्ख्यायां वा निकटस्थे आरक्षककेन्द्रे (Police Station) दद्युः। सूचनादातॄणां परिचयः पूर्णतः गोपनीयः रक्षिष्यते।
तेन प्रतिपादितं यत् मुख्यमन्त्रिणः सशक्तनेतृत्वे यूनां सक्रिय- सहभागितया च हिमाचलप्रदेश- आरक्षकदलं प्रदेशे चिट्टा- माफियासमूहस्य समूलनाशाय सर्वविधं प्रयत्नं करोति, यस्य सकारात्मकपरिणामाः सम्मुखं आगच्छन्ति।

**-विकासशुक्लः,एसडीएम सुजानपुरम्, मेला-अधिकारी च।**

# सुजानपुर-होली-महोत्सवः- राष्ट्रस्तरीय- होली- उत्सवाय अलङ्कृतं चौगानक्षेत्रम्, उपमुख्यमन्त्री उद्घाटनं करिष्यति



**हिमसंस्कृतवार्ताः- हमीरपुरम्।**
महाराज-संसार चंद-महाभागस्य ऐतिहासिक-नगरे सुजानपुरे चतुर्दिवसीयः राष्ट्रस्तरीय-होली- महोत्सवः रविवासरे आरभ्यते। उपमुख्यमन्त्री मुकेश अग्निहोत्री अपराह्ने मेलस्य शुभारम्भं करिष्यति। तस्मात् पूर्वं आयोजनसम्बन्धे शनिवासरे उपायुक्ता गन्धर्वा-राठौड विभागीय-अधिकारिभिः सह चौगानक्षेत्रस्य निरीक्षणं कृत्वा आवश्यकनिर्देशान् दत्तवती। सा अवदत् यत् शुभारम्भात् पूर्वं पगड़ी-रस्म-सहितं शोभायात्रा निर्गमिष्यति। ततः प्राचीन- मुरली मनोहरमन्दिरे पूजाऽर्चनया सह राष्ट्रस्तरीय- होली- मेलस्य विधिवद् उद्घाटनं भविष्यति।शुभारम्भानन्तरं उपमुख्यमन्त्री चौगाने विविधविभागानां, बोर्डानां, निगमाणां, सार्वजनिक- उपक्रमाणां, संस्थानां तथा स्वयं- सहायता- समूहानां प्रदर्शनीनां उद्घाटनं निरीक्षणं च करिष्यति। सायंकाले कलाकेन्द्रे दीप-प्रज्वलनेन प्रथम- सांस्कृतिक-सन्ध्यायाः आरम्भः भविष्यति। अस्याः सांस्कृतिक-सन्ध्यायाः मुख्य-आकर्षणं पंजाबीगायकः बब्बू मान तथा 'हार्मनी ऑफ द पाइन्स' इति संगीत-दलम् भविष्यतः। दूरदूरात् आगताः व्यापारीणः शनिवासरे एव स्वव्यापारं प्रारब्धवन्तः। प्रशासनेन मेलास्थलस्य शोभावर्धनं क्रियते। जन-मनोरञ्जनार्थं विविधदोलाः संस्थापिताः, यानस्थापनार्थं पार्किङ्गस्थलं निर्मितम्। अस्मिन् वर्षे विशेष-आकर्षणरूपेण सेल्फी- प्वाइण्ट, चम्बा-रूमाल-प्रदर्शनी, हिमाचली- झमाकड़ा- नृत्यप्रस्तुतिः च सन्ति। अपि च पशुधन- प्रदर्शनी तथा महिला-प्रतियोगिताः अपि आयोज्यन्ते।आकाशीयदीप्त्या आलोकितं भविष्यति आकाशम्। राष्ट्रस्तरीय-होली- महोत्सवे अस्मिन् वर्षे नूतनगतिविधयः अपि समाविष्टाः। उद्घाटनदिवसे, मार्चमासस्य प्रथमतिथौ सायंकाले टीहरास्थित- ऐतिहासिक-दुर्गात् उत्सवस्थल- चौगानपर्यन्तम् आकाशीय-दीपाः उड्डीयिष्यन्ते। तैः दीप्यमानं सुजानपुर-आकाशं शोभायमानं भविष्यति। दुर्गपरिसरे दीपप्रज्वलनम् अपि भविष्यति। 03 मार्च सायंकाले ब्यास नदीतीरे ब्यास आरती अपि आयोज्यते, यत्र बहवः जनाः सहभागं करिष्यन्ति। राष्ट्रीय- होलीमहोत्सव- निमित्तं हिमाचल पथ परिवहन निगमसंस्थया चत्वारः विशेष-बसयानानि सञ्चालयिष्यन्ते। एतानि यानानि सुजानपुरात् विविधगन्तव्येषु गमिष्यन्ति। आवश्यकतानुसारं बससंख्यायाः वृद्धिः अपि भविष्यति, यात्रिकाणां आगमन- गमनयोः काचित् अपि असुविधा न भविष्यति। सुरक्षाव्यवस्था अपि सुदृढा भविष्यति। अप्रिय-घटनानां निवारणार्थं शतं सुरक्षाकर्मिणः नियोजिताः सन्ति- पञ्चाशत् होमगार्ड- पञ्चाशत् पुलिस- कर्मचारिणः। सांस्कृतिकसन्ध्यासु जनसमागमः अधिकः भवति, अतः सुरक्षाव्यवस्थायां विशेषप्रयत्नाः कृताः। अग्निशमन- विभागस्य अपि एकं यानं स्थले सज्जं भविष्यति। सुजानपुर- होलीमहोत्सवस्य सर्वाः सज्जताः सम्पन्नाः। उपमुख्यमन्त्री राष्ट्रस्तरीय-होली-मेलस्य विधिवद् उद्घाटनं करिष्यति। आयोजनसम्बन्धे सर्वाः व्यवस्थाः सम्यक् सम्पन्नाः सन्ति।

# Mandi Holi Celebration- सोमवासरे मण्ड्याः 'सेरीमञ्चे' एव भविष्यति रङ्गोत्सवः, संशयस्य मेघाः अपगताः, प्रशासनेन नियमेषु शिथिलता प्रदत्ता




**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।**
मण्ड्याः ऐतिहासिके 'सेरीमञ्चे' होलीपर्वणि गुलाल- प्रक्षेपणं प्रति ये संशयस्य मेघाः मण्डयन्ति स्म, ते अधुना अपगताः। होली- उत्सवस्य आयोजनं प्रति प्रशासक-आयोजकयोः मध्ये वर्तमानाः मतभेदाः वार्तालापेन समाप्ताः। प्रशासनस्य येषु नियमेषु आयोजकानाम् आपत्तिः आसीत्, ते नियमाः यावत् निरस्ताः कृताः अथवा तेषु शिथिलता प्रदत्ता, येन होली-पर्वणि गुलाल- प्रक्षेपणस्य मार्गः स्थानं च स्पष्टम् अभवत्। मण्ड्याः उपायुक्तस्य अपूर्वदेवगनस्य अध्यक्षतायां इयं गोष्ठी आयोजिता।
मण्डी- आरक्षकदलेन (Police) होली-उत्सवार्थं प्रथमतया केचन कठोराः नियमाः प्रदर्शिताः आसन्, येन आयोजकाः सेरीमञ्चे उत्सवस्य आयोजनात् विमुखाः अभवन्। यथा एव सामाजिकमाध्यमेषु एषः विषयः चर्चितः जातः, तथैव प्रशासनेन आयोजकैः सह उपविश्य नियमेषु शिथिलता प्रदत्ता। ततः परं आयोजन-समित्या उत्सव- आयोजनाय अनुमतिः दत्ता। पूर्वं आरक्षकदलेन ३५०० जनानामेव सीमा निर्धारिता आसीत्, या अधुना निरस्ता। महिलानां कृते पृथक् व्यवस्थायाः विषये आयोजकाः सम्मताः अभवन्। शान्ति-व्यवस्थायाः दायित्वं आरक्षकदलाय दत्तम् अस्ति।

**केषुचित् नियमेषु शिथिलताः**
उपायुक्तः अपूर्वदेवगनः अवदत् यत् होली- उत्सवस्य परम्परा अक्षुण्णा भवेत्। अत एव केषुचित् प्रतिबन्धेषु शिथिलता कृता अस्ति।
**समयनिर्धारणम्**-सेरीमञ्चे होलीक्रीडायाः समयः निश्चितः कृतः। मार्चमासस्य २ दिनाङ्के प्रातः सार्धदशवादनात् (१०:३०) अपराह्ने एकवादनं (१:००) यावदेव गुलालप्रक्षेपणं भविष्यति। ततः परं द्विवादने (२:००) राजा माधोरायः शिबिकायाम् आरुह्य नगरभ्रमणं कुर्वन् 'पड्डलमैदानं' प्रति गमिष्यति। होलिकादहनेन सह उत्सवस्य समापनं भविष्यति।

**उच्छृङ्खलतायाः वर्जनम्**
आयोजनसमित्याः सदस्यः धर्मेंद्रः अवदत् यत् जनाः आनन्देन होलीक्रीडां कुर्वन्तु, किन्तु उच्छृङ्खलतां न कुर्वन्तु। अनेन एव होलीपर्वणः मर्यादा परम्परा च सुरक्षिता भविष्यति।

# विंशति- विंशतिः विश्वचषकः 2026

## विश्वचषकस्य सुपर-8 क्रीड़ायां भारतस्य पराक्रमः

**हिमसंस्कृतवार्ताः- कामेश्वर शर्मा, शिमला।** विंशति- विंशतिः क्रिकेट विश्वचषके कोलकातानगरस्य ईडेन गार्डन इति क्रीडांगणे भारतेन वेस्टइंडीजदलं 5 स्तोभैः पराजितम्। अनेन विजयेन भारतीयदलम् उपांत्यचक्रेऽप्रविष्टम्। तत्रैव वेस्टइंडीजदलं स्पर्धातः बहिरभवत्। पणकं विजित्य भारतेन क्षेत्ररक्षणं चयनितम्। वेस्टइंडीज देशस्य प्रारम्भः सुदृढः अभवत्। वेस्टइंडीज पक्षतः शे होप 32, रस्टन चेज 40, शेमरॉन हेटमायर 27, रदर फोर्ड 14, रोवमेन पॉवेल अविजितं 34*, जेसन होल्डरश्च अविजितं 37* धावनाकान् अर्जितवन्तः। इत्येतेषां सहयोगेन वेस्टइंडीजदेशेन 20 कन्दुकचक्रेषु 4 स्तोभहानौ 195 धावनांकाः अर्जिताः। भारतस्य कृते विजेतुं 196 धावनांकानां लक्ष्यं प्रदत्तम्। लक्ष्यप्राप्तिक्रमे भारतस्य प्रारम्भः सुदृढः नाभवत्। भारतपक्षतः अभिषेक शर्मा 10, ईशान किशनश्च 10 शीघ्रमेव बधितौ। तदनु सूर्यकुमारयादवः 18, हार्दिक पांड्या 17, तिलक वर्मा च 27 धावनांकान् अर्जितवन्तः। परन्तु स्पर्धायाः विशिष्टः आसीत् भारतस्य प्रारम्भिकः क्रीडकः संजू




सैमसन येन अविजितं 97* धावनांकानां योजनं कृत्वा भारतस्य जयं सुनिश्चितम्। तस्य परिश्रमेण सर्वेषां सहयोगेन च भारतेन 19.2 कन्दुचक्रेषु 5 स्तोभहानौ लक्ष्यं प्राप्तम्। स्वकीयोत्कृष्टप्रदर्शनाय संजू सैमसनः स्पर्धापुरुषः चयनितः।इदानीं अग्रिमे चक्रे मार्चमासस्य चतुर्थे दिनांके दक्षिण अफ्रीका- न्यूज़ीलैंडदलयोः, पंचमे च भारत-इंगलैंडदलयोश्च मध्ये उपांत्यचक्रीयाः प्रतिस्पर्धाः भविष्यन्ति।

# अमेरिका-ईरान युद्धम्- वर्तमान-स्थित्याः विवरणम्



**मुख्य-घटना** अमेरिका-देशस्य 'ऑपरेशन एपिक फरी' (Operation Epic Fury) इत्यस्य अन्तर्गतं ईराने भीकराक्रमणम्।

**१. युद्धस्य प्रारम्भः उद्देश्यं च**

गतदिनेषु (२८ फरवरी २०२६) अमेरिका-देशस्य राष्ट्रपतिना डोनाल्ड ट्रम्प महोदयेन ईरान-देशस्य विरुद्धं सैन्य-कार्यवाह्याः उद्घोषणा कृता। अस्य मुख्यम् उद्देश्यं ईरानस्य परमाणु-केन्द्राणि विनाशयितुं तथा च तत्र 'शासन-परिवर्तनं' (Regime Change) कर्तुम् अस्ति। इज़राइल-देशोऽपि अस्मिन् युद्धे अमेरिकया सह 'ऑपरेशन रोरिंग लायन' इति नाम्ना सम्मिलितः अस्ति।

**२. प्रमुखाः घटनाः (Highlights)**

नेतृत्व-विनाशः: वैदेशिक-वार्तानुसारं ईरानस्य सर्वोच्च-नेता आयतुल्लाह अली खामेनेई तस्य परिवारः च अमेरिकी-आक्रमणे मृताः। सम्प्रति ईराने एका 'अन्तरिम-नेतृत्व-परिषद्' सक्रिया अस्ति।

क्षति-विवरणम्: ईराने रिवोल्यूशनरी गार्ड (IRGC) इत्यस्य मुख्यालयाः मिसाइल-केन्द्राणि च विनष्टानि। अस्मिन् युद्धे अद्यावधि २०० तः अधिकाः जनाः मृताः इति सूचना अस्ति।

**अमेरिकी-सैनिक-क्षतिः**- पेन्टागन-पक्षतः स्पष्टीकृतं यत् युद्धे ३ अमेरिकी-सैनिकाः वीरगतिं प्राप्ताः।

३. ईरानस्य प्रत्युत्तरम् (Retaliation)

ईरान-देशेन अपि स्वस्य रक्षायां भीकराक्रमणं कृतम्। इज़राइल-उपरि आक्रमणम्: ईरानेन 'तेल अवीव' नगरे अनेकाः बैलिस्टिक-मिसाइल-अस्त्राः प्रक्षिप्ताः। खाड़ी-देशाः- बहरीन, कुवैत, कतर इत्यादिषु देशेषु स्थितेषु अमेरिकी-सैन्य-शिविरेषु ईरानेन आक्रमणं कृतम्।

**होर्मुज-जलसन्धिः**- ईरानेन 'स्ट्रेट ऑफ होर्मुज' (Strait of Hormuz) इति मार्गं निरोद्धं (block) तर्जनं दत्तम्, येन विश्वे तैल-आपूर्तिः बाधिता भवितुं शक्नोति।

**४. वर्तमान-स्थितिः (Current Status)**

सम्प्रति (मार्च २०२६) स्थितिः अतीव गम्भीरा अस्ति। यद्यपि राष्ट्रपतिः ट्रम्पः उक्तवान् यत् ईरानस्य नूतनं नेतृत्वं वार्तालापाय सिद्धं दृश्यते, तथापि युद्धविरामस्य चिह्नानि न दृश्यन्ते। विश्वस्य प्रमुखाः देशाः (यथा-ब्रिटेन, फ्रांस, जर्मनी) अपि स्वसेनां सज्जतायां स्थापितवन्तः।




# पाकिस्तान-अफगानिस्तान सीमा-सङ्घर्षः- 'मुक्त-युद्धस्य' उद्घोषणा



पाकिस्तान-अफगानिस्तानयोः देशयोः सीमासु भीकरं युद्धं प्रचलति।

**१. युद्धस्य मुख्यकारणम्** - पाकिस्तान-सर्वकारेण आरोपः कृतः यत् अफगानिस्तान-देशः स्वभूमौ 'टीटीपी' (TTP) इति आतङ्कवादि-समूहस्य रक्षणं करोति। अस्य प्रत्युत्तरे पाकिस्तानेन अफगानिस्तानस्य प्रमुखनगरेषु (यथा- काबुल, कन्दहार, खोस्त) 'ऑपरेशन गजब-लिल्-हक' (Operation Ghazab-lil-Haq) इति नाम्ना हवाई-आक्रमणं (Airstrikes) कृतम्। पाकिस्तानस्य रक्षातन्त्रेण उक्तं यत् सम्प्रति उभयोः देशयोः मध्ये 'मुक्त-युद्धं' (Open War) आरब्धम् अस्ति।

**२. प्रमुखाः घटनाः**- पाकिस्तानेन पुष्टिकृता यत् तेन ४१५ तः अधिकाः तालिबान-सैनिकाः मारिताः। अपरपक्षे तालिबान-सर्वकारेण उक्तं यत् तस्य आक्रमणे ८० तः अधिकाः पाकिस्तान-सैनिकाः मृताः, २७ सैन्य-शिविराणि च वशीकृतानि।

**वायुआक्रमणम्**- अफगानिस्तानस्य वायुरक्षाप्रणाल्या (Air Defense) काबुल-नगरे पाकिस्तानस्य एकं युद्ध-विमानं (Fighter Jet) निपातितम् इति सूचना अस्ति, तस्य चालकः (Pilot) अपि बन्दीकृतः।

**नागरिक-क्षतिः**- अफगानिस्तानेन आरोपः कृतः यत् पाकिस्तानस्य आक्रमणेन अनेके निरपराधाः नागरिकाः (प्रायः ५५ जनाः) मृताः।

**३. वैश्विक-प्रतिक्रिया भारतम्**- भारत-देशेन अफगानिस्तान-भूमौ पाकिस्तानस्य वायुआक्रमणस्य निन्दा कृता अस्ति। **संयुक्त-राष्ट्र-सङ्घः**- यूएन (UN) इत्यनेन उभौ पक्षौ शान्तिं स्थापयितुं युद्धविरामं (Ceasefire) कर्तुं च प्रार्थितौ।सऊदी अरब-कतरः एतौ देशौ मध्यस्थतां (Mediation) कर्तुं प्रयत्नं कुरुतः।पाकिस्तानस्य प्रधानमन्त्री शहबाज शरीफः देशस्य गम्भीर-स्थितिं दृष्ट्वा स्वस्य रूस-देशस्य यात्रां स्थगितवान् अस्ति।

# देशव्यापी 'जनऔषधि-सप्ताह-२०२६' इत्यस्य शुभारम्भः

स्वल्पमूल्ये तथा च गुणवत्तापूर्ण-जेनेरिक-औषधीनां विषये जागरूकतां जनयितुं 'जनऔषधि-सप्ताह-२०२६' अद्य तः सम्पूर्णे देशे स्वास्थ्य-परीक्षण-शिबिरैः सह आरब्धः। रसायन-उर्वरक-मन्त्रालयेन सूचितं यत् सप्ताह-पर्यन्तं प्रचलन् अयं उत्सवः अष्टम-जनऔषधि-दिवस-पर्यन्तं भविष्यति। मन्त्रालयेन उक्तं यत् अस्मिन् कार्यक्रमे औषध-विभागेन वर्तमान-मासस्य ५ दिनाङ्क-पर्यन्तं देशे २५० तः अधिकेषु स्थानेषु स्वास्थ्य-परीक्षण-शिबिराणि आयोज्यन्ते। कार्यक्रमस्य प्रथमे दिने देशे प्रायः ५० स्थानेषु स्वास्थ्य-शिबिराणि आयोजितानि। एतेषु शिबिरेषु सामान्य-स्वास्थ्य-परीक्षणं तथा अन्याः सेवाः प्रदत्ताः, येषु निःशुल्क-रक्त-परीक्षणं, रक्तचाप-परीक्षणं (Blood Pressure), थायरॉइड-परीक्षणं च अन्तर्भवन्ति। शिबिरेषु जनऔषधि-औषधीनां निःशुल्क-वितरणमपि अभवत्। अनेक-केन्द्रेषु 'फिजियोथेरेपी' परामर्शः, नेत्र-परीक्षणं, बाल-स्वास्थ्य-सम्बद्धाः कार्यक्रमाः च अपि आयोजिताः। प्रधानमंत्री-भारतीय-जनऔषधि-परियोजना (PMBJP) इत्यस्य अन्तर्गतं सम्पूर्णे देशे १८ सहस्राणि (18,000) तः अधिकाणि जनऔषधि-केन्द्राणि कार्यं कुर्वन्ति। मन्त्रालयेन उक्तं यत् एषा परियोजना सर्वेभ्यः न्यूनमूल्ये गुणवत्तापूर्ण-औषधीनां उपलब्धतां सुनिश्चितं कृत्वा भारतस्य स्वास्थ्य-प्रणालीं सुदृढां कर्तुं महतीं भूमिकां निर्वहति। सर्वकारेण २०२७ वर्ष-पर्यन्तं एतां शृङ्खलां २५ सहस्र-केन्द्रेषु विस्तारयितुं लक्ष्यं निर्धारितम् अस्ति, येन दुर्गम-क्षेत्रेषु अपि औषधीनां प्राप्तिः सुलभं स्यात्।



हिमसंस्कृतवार्ताः , ईदृधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी**- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या**- नमस्ते नन्दिनि। अहो, बेङ्गलुरु-नगरे एकेन भाटकवासिना महती पीडा सोढा। तस्य गृहस्वामिना गृह-वर्णलेपन-व्याजेन एकपञ्चाशत्- सहस्रं रूप्यकाणि कर्षितानि। एतत् अधर्म्यं खलु?

**नन्दिनी**- सत्यम्, धनलोभः सर्वत्र दृश्यते। इदानीं पश्य, महाराष्ट्रस्य एकस्य कृषकस्य सर्वत्र प्रशंसा क्रियते। तेन शुष्कप्रदेशे अपि तृणबदर-फलानां नूतना कृषिः कृता। एतेन बहु लाभः प्राप्तः अस्ति।

**काव्या**- उत्तमम्! नूतन-प्रयोगैः देशः विकसति। तां वार्तां विहाय अन्यां शृणु, अमेरिका-देशे एकया वृद्धया स्वस्य शतवर्षीयः जनकः भोजनशालां प्रति नीतः। तयोः कृते निःशुल्कं भोजनं दत्तम्, यतः सा जनकेन सह आगतवती अस्ति। एषः विचित्रः नियमः भोजनशाला-स्वामिना बहुकालं पूर्वं कृतः।

**नन्दिनी**- कियती सुखदा इयं कथा! श्रद्धा प्रेम च सर्वदा जयति। किन्तु देहली-नगरे एकं दुःखदं दृश्यं दृष्टम्। एकेन पुरुषेण उपवने महिला ताडिता। जनाः केवलं मूकप्रेक्षक-भूताः। एतत् अति निन्दनीयम्।

**काव्या**- सत्यम्, तादृशं समाजस्य मौनं भयं जनयति। अस्तु, इदानीं विरमामः।

## हास-परिहासम्

वैशाखनंदनः- गर्दभः
ग्रामसिंहः- कुकुरः 😅 😯
किञ्चित् इतोऽपि विस्तृतं करोमि 😍
गृहसिंहः- एलसेशियन 😄
ग्रामसिंहः- डोबरमैन 😊
नगरसिंहः- बुलडॉग 🤣
अधुना पर्याप्तम् 🤣 😄

## पति-पत्नी हास्यकणिका

**पत्नी**- (दर्पणे आत्मानं पश्यन्ती) "अये पश्यतु, अहं कति स्थूला, कुरुपा च जाता अस्मि! मम प्रशंसायां किमपि वदतु येन मम मनः प्रसन्नं भवेत्।"

**पतिः**- (क्षणं विचिन्त्य) "प्रिये! तव दृष्टिः (Eyesight) अतीव उत्तमा अस्ति, यतः भवती एतादृशं सत्यं द्रष्टुं शक्नोति!"

पत्नी- (क्रोधेन) "गच्छतु! अद्य भोजनं स्वयं पचतु!"